अथ प्रणवप्रसङ्गात् शक्तिप्रणवमन्त्रविधिश्च कल्पान्तरोक्तोऽत्र लिख्यते—

ईश ऋषिः। पंक्तिश्छन्दः। शक्तिभैरवी देवता। आं हृत्। ईं शिरः। इत्यादिदीर्घस्वरषट्कैरङ्गानि। (ध्यानम्—)

प्रकाशमध्यस्थितचित्स्वरूपां वराभये संदधतीं त्रिणेत्राम्।
सिन्दूरवर्णामतिकोमलाङ्गीं मायामयीं तत्वमयीं नमामि ॥

ध्यानान्तरम्—

कल्पद्रुमूलमणिकुट्टिमसंनिविष्टां मुक्तातपत्रकृतमौक्तिकवृष्टिहृष्टाम्।
इष्टाभये विदधतीमरुणां त्रिणेत्रां इष्टाभये भगवतीमनुशीलयामः ॥

ईं इति मन्त्रः सबिन्दुकः चतुर्थः स्वरः। एकविंशतिलक्षं जपेत्। दशांशमाज्यैर्हुनेत् पुरश्चरणार्थम् ॥ अत्यैश्वर्यफलप्रधानोऽयं मन्त्रः।

अथ पूजा—प्राक् नवमे पटले भुवनेशीविधानोक्तपीठे समावाह्य समर्चयेत्। एकशक्तित्वादावरणादयो न सन्ति। अथ भुवनेश्वरीत्रिगुणित-विधानोक्तवत् संपूजयेत् ॥

अथास्य मन्त्रस्य न्यासविधिः—

ऐं ह्रीं श्रीं सुप्रबोधकनाथश्रीपादुकां पूजयामि। ऐं ह्रीं श्रीं रक्ताम्बा-पादश्रीपादुकां पूजयामि। बीजत्रयादि शुक्लाम्बापादश्रीपादुकामित्यादि० निष्कलानन्दनाथ श्रीपादुकेत्यादि० सकलानन्दनाथ श्रीपादुकेत्यादि० नवात्मा-नन्दनाथ श्रीपादुकेत्यादि० अक्रूरानन्दनाथ श्रीपादुकेत्यादि० इति मूर्ध्नि तत्रैव वामे दक्षिणे पूर्वदक्षिणपश्चिमोत्तरेषु विन्यसेत्। सर्वत्र बीजत्रयादि च। पुनः सच्चिदानन्दपरमशिवसंविदे नमः। चिदानन्दपरमशिवसंविदे नमः। आनन्दानन्दपरमशिवसंविदे नमः। इति नाभौ तद्वामे तद्दक्षिणे च बीज-त्रयाद्येवं न्यसेत् ॥ पुनः ईं नमः इति मूलमन्त्रेण नाभिहृदयभ्रूमध्येषु न्यस्त्वा पुनः सपरमार्धात्मकबिन्दद्वङ्कितवक्त्रश्रीपादुकां पूजयामि० बिन्दुद्वयाङ्कितस्तनयुगल श्रीपादुकां पूजयामि० सपरमार्धकबिन्दुव्यञ्जितरेखायोनिश्रीपादुकां पूजयामीति बीजत्रयादिमुखस्तनयुगळयोनिषु न्यस्य, पुनर्मूलमन्त्रेण षट्त्रिंशद्वारं प्राणायामं कृत्वा, लिपिन्यास करन्यास व्यापकाङ्गऋष्यादीन्कृत्वा जपेत् ॥